Gyanshauryam, International Scientific Refereed Research Journal
© 2022 GISRRJ | Volume 5 | Issue 5 | ISSN : 2582-0095

# संस्कृतसाहित्ये ईश्वरचन्द्र-विद्यासागरस्य योगदानम्

Pradip Sing
Research Scholar, Department of Vyakarana, National Sanskrit University, Tirupati, Andhra Pradesh, India

**Article Info**
Volume 5, Issue 5
Page Number : 66-75

**Publication Issue :**
September-October-2022

**Article History**
Accepted : 01 Oct 2022
Published : 15 Oct 2022

**सारांश:** – संस्कृतसाहित्ये मानवसभ्यताया: सर्वाणि उपादेयोपादानानि सर्वाङ्गपरिपूर्णरीत्या अत्र सन्निवेशितानि। साहित्यं समाजस्य दर्पण:। समाजे यत् किमपि कार्यं क्रियते तत्साहित्ये प्रतिविम्बितं भवति। तस्मादेव कारणात् साहित्यिका: समाजे पूजिता:। अतएव– 'साहित्यसङ्गीतकलाविहीन: साक्षात्पशु: पुच्छविशाणहीन:' इत्युक्ति:। प्रपञ्चेऽस्मिन् संस्कृतसाहित्यस्य यावान् विकास: परिलक्ष्यते न तथा इतरसाहित्यानाम्। संस्कृतसाहित्यं वैदिक-लौकिकभेदेन द्विधा विभज्यते। वैदिकसाहित्ये वेद-उपनिषत्-ब्राह्मण-आरण्यक-वेदाङ्ग-सूत्र-स्मृतिग्रन्था: बहवो सन्ति। लौकिकसाहित्ये च रामायण-महाभारत-पुराण-काव्यादीनि अन्तर्भवन्ति। सर्वेषां महत्वं प्रासङ्गिकता च सर्वदा अस्माकं भारतीयसंस्कृतौ वर्तेते इत्यत्र नास्ति सन्देह। भारतवर्षे संस्कृतीनां महती परम्परा अस्तीति पौरस्त्य-पाश्चात्य-विपश्चितामपश्चितं मतम्। बङ्गदेशे संस्कृतसाहित्ये वेद:-व्याकरणं-साहित्यं-दर्शन:-काव्यं विविधविषये चर्चा परिलक्ष्यते। ऊनविंशशतके व्रिटिशशासनकाले संस्कृत-चर्चाया: प्रचारप्रसारे अस्माकं बङ्गदेशे नवजागरणस्य प्राग्काले प्रात: स्मरणीयस्य मनीषी पण्डितस्य ईश्वरचन्द्र-विद्यासागरस्य योगदानम् अविस्मरणीयम्। अत: संस्कृतसाहित्ये ईश्वचन्द्र-विद्यासागरस्य योगदानम् इति विषयमाधारीकृत्य मया लेखेऽस्मिन् विषय: विहित:।

**विशेषशब्द:** - बङ्गदेशे संस्कृतसाहित्यचर्च्चा:, ईश्वरचन्द्रविद्यासागरस्य परिचय:, कृतय:, उपक्रणिका, व्याकरणकौमुदी, ऋजुपाठ:, कथामाला, संस्कृतसाहित्यशास्त्रविषयकप्रस्ताव:, श्लोकमञ्जरी, भूगोलखगोलवर्णनम्, वासुदेव चरितम्, सीताया: वनवास:, रघुवंशम्, किराताज्र्जुनीयम्, शिशुपालवधम्, कुमारसम्भवम्, कादम्बरी, मेघदूतम्, उत्तररामचरितम्, हर्षचरितम्, सर्वदर्शनसंग्रह: इत्यादय:।

सभ्यता-संस्कृति-संस्काराणां-स्वरूपविशेष: एव संस्कृतम्। सभ्यता इत्यत्र सुप्राचीनवैदिकसभ्यता इति ज्ञेया। संस्कृतिरिति शब्दोऽयं सम्-पूर्वकात् कृ-धातो:, क्तिन् प्रत्यये निष्पद्यते, भारतीय संस्कृतिरेव बोध्या। संस्कार: इति शब्दोऽयं सम्-पूर्वकात्, कृ-धातो: घञ् प्रत्ययात् निष्पन्नो, यस्यार्थो भवति पूर्णत्वप्रदानं, सज्जीकरणं, क्षालनात् प्रस्फुटनं, शृङ्गारकरणञ्चेति। पुनश्च सम्-पूर्वकात्, कृ-धातो:, क्त-प्रत्ययात् संस्कृतशब्द: समुत्पन्न:, यस्यार्थ: शुद्धं, परिष्कृतं, परिमार्जितञ्चेति। एवं व्यवहारिकदृष्ट्या सभ्यता-संस्कृति-संस्कारानां-संस्कृतशब्दानाम् अन्योऽन्याभावसम्बन्ध:, येषां समान एव अर्थो युक्तिसङ्गतो भवति।

संस्कृति: मानवजाते: जीवनशक्ति:। संस्कृतिमाधारीकृत्य एव मानवजाते: अस्तित्वं परिकल्पयते। तत्र सम्-उपसर्गात् कृ-धातो: क्तिन-प्रत्ययेन निष्पन्नं संस्कृतिरिति पदं सम्यक् कृति: संस्कृतिरित्यर्थं व्युत्पत्त्या बोधयति। या कृति:

**Copyright:** © the author(s), publisher and licensee Technoscience Academy. This is an open-access article distributed under the terms of the Creative Commons Attribution Non-Commercial License, which permits unrestricted non-commercial use, distribution, and reproduction in any medium, provided the original work is properly cited

मानवसमाजस्य सर्वविधामभिवृद्धिं साधयति, यया च मानवजाति: विश्वे परिचिता भवति, सा खलु संस्कृतिपदेनाभिधीयते। अत: संस्कृतिर्नाम सामाजिकव्यवहारस्य समुन्नते: काचित् निरविच्छिना प्रवाहपरम्परा। अथवा सामाजिकव्यवहारस्य परम्परा निरन्तरं प्रचलनमेव क्रमश: संस्कृतौ परिणमति ।

संस्कृतसाहित्यमत्यन्तं व्यापकम् । मानवसभ्यताया: सर्वाणि उपादेयोपादानानि सर्वाङ्गपरिपूर्णरीत्या अत्र सन्निवेशितानि। मानवजीवनस्य सर्वमेव दैनन्दिनकार्यमनेन संस्कृतसाहित्येन एव नियन्त्रितं भवति।

विशिष्ठैतिहासिक: M.Winternitz महोदय: भारतीयसंस्कृतिसाहित्यस्य महत्त्वं वर्णयन् भाषते - If we wish to learn, to understand the beginnings of our own culture, if we understand the oldest Indo-European culture we must go to India, where the oldest literature of an Indo-European is preserved[1]. इति।

संस्कृतसाहित्यस्य नामलिङ्गानुशासने प्रसिद्धकोषे अमरसिंहेन उच्यते - "मोक्षे धी: ज्ञानमन्यत्र विज्ञानं शिल्पशास्त्रयो:" इति। एतद् द्वयं संस्कृतसाहित्ये वर्तेते। यथा च महाभारतस्य प्रशंसायां समालोचकाः वदन्ति - 'यदिहास्ति न तत्क्वचित् यन्नेहास्ति न तत्क्वचित्' [2] इति। तथा च ज्ञान-विज्ञान-कला-साहित्य-शिल्प-शास्त्र-शास्त्रादय: सर्वेऽपि विषया: संस्कृतभाण्डारगारे उपनिबद्धा:।

विदितमेव यति साहित्यं समाजस्य दर्पण:। समाजे यत् किमपि कार्यं क्रियते तत् साहित्ये प्रतिविम्बितं भवति । तस्मादेव कारणात् साहित्यिका: समाजे पूजिता:। अतएव यत् - 'साहित्यसङ्गीतकलाविहीन साक्षात्पशु: पुच्छविशाणहीन:"।[3] इति ।।

साहित्यं विहाय संसारस्य, संसारं विहाय साहित्यस्य स्थिति: नास्त्येव। प्रपञ्चेऽस्मिन् संस्कृतसाहित्यस्य यावान् विकास: परिलक्ष्यते न तथा इतरसाहित्यानाम्। अपि च संस्कृतसाहित्ये विविधैरालङ्कारिकै: सूक्ष्मातिसूक्ष्मविचारा: यावन्त: विरचिता: विद्यन्ते, न तथा संस्कृतेरसाहित्येषु अवलोक्यन्ते।

विविधलक्षणग्रन्थानाम् आविर्भाववशात् संस्कृतभाषा स्वतन्त्ररीत्या तार्किकशैल्या स्वाभिप्रायं प्रकट्य संस्कृतसाहित्यस्य महिमानं सम्बर्धयति। पुनश्च गद्यपद्यचम्पूनाटकनीतिकथासूक्ति-भाण्डारगारै: संयुक्तं संस्कृतसाहित्यं विश्वस्य सर्वाणि साहित्यानि अतिशेते। इदं साहित्यं वैदिक-लौकिकभेदेन द्विधा विभज्यते। वैदिकसाहित्ये वेद-उपनिषत्-ब्राह्मण-आरण्यक-वेदाङ्ग-सूत्र-स्मृतिग्रन्था: बहवो सन्ति। लौकिकसाहित्ये च रामायण-महाभारत-पुराण-काव्यादिनि अन्तर्भवन्ति। सर्वेषां महत्त्वं प्रासङ्गिकता च सर्वदा अस्माकं भारतीयसंस्कृतौ वर्तते इत्यत्र नास्ति सन्देह।

**वङ्गदेशे संस्कृतसाहित्य चर्च्चा**: - बङ्गप्रदेशे कदा संस्कृतसाहित्यस्य चर्चाया: प्रारम्भ: अभवत् इति निश्चेतुं काठिन्य तु वर्तते। गुप्तयुगे आनुमानिक: 350 खीष्टाब्दे विरचितात् एकस्मात् लेखमालात: एतस्य प्रमाणं प्राप्यते। खीष्टीयशप्तदशशतके वङ्गप्रदेशे संस्कृतचर्च्चाया: एकं परिपूर्णं चित्रं लक्ष्यते। वङ्गीयपण्डितानां सृष्टा रचनारीति आलङ्कारिका: गौडी वा गौडीय रीतिनामेन परिचिता आसीत्। पालसेनयुगेऽपि संस्कृतचर्च्चाया: प्रसारोऽभवत्। ईसाई शासनकालस्य प्रारम्भे यद्यपि संस्कृतचर्च्चाया: प्रचार-प्रसारधारा: अवरूद्धा: तथापि परवर्तिकाले भृशं संस्कृतचर्च्चाया: प्रचारप्रसारस्य निदर्शनं परिलक्ष्यते। तत्र संस्कृतसाहित्ये वेद: - व्याकरणं - साहित्यं - दर्शन: - काव्य - विविधविषये चर्च्चा: परिलक्ष्यते। विशेषत: वङ्गे नवद्वीपे इत्यारजस्य स्थानकस्य न्यायशास्त्रस्य चर्च्चा स्मरणीया वन्दनीया च। पञ्चदशशतकत: सप्तदशशतकपर्यन्तं

[1] . A History of Indian Literature

[2] . म.भा. - 1/62/53

[3] . नीतिशतकम् - 12

वङ्गप्रदेशे नव्यन्यायचर्चा सुप्रसिद्धासीत्। ऊनविंशशतके व्रिटिशशासनकालेऽपि संस्कृत–चर्च्चायाः प्रचारप्रसारे अस्माकं बङ्गदेशे नवजागरणस्य प्रागकाले प्रातः स्मरणीयः मनीषी पण्डितः ईश्वरचन्द्रविद्यासागरस्य योगदानम् अविस्मरणीयम्।

**ईश्वरचन्द्र-विद्यासागरस्य परिचयः** – भारतराष्ट्रस्य पूर्वभागः वङ्गप्रदेशः इत्युक्ते अधुना तेन पश्चिमबङ्गराज्यस्य मेदिनीपुरमण्डलस्य वीरसिंह नामेति ग्रामे एकः दरिद्रब्राह्मणः परिवारे 1820 ख्रिष्टीयाब्दस्य (1227 वङ्गाब्दे आश्विनमासस्य द्वादशदिनाङ्के) सेप्टेम्बरमासस्य षट्विंशविंशतितमे दिनाङ्के मङ्गलवासरे ईश्वरचन्द्रवन्दोपाध्यायः जन्म लब्धवान्। पितुर्नाम ठाकुरदास–वन्दोपाध्यायः माता च भगवतीदेवी। पञ्चमे वयसि ईश्वरचन्द्रस्य विद्यारम्भः ग्राम्यपाठशाला कालीकान्त–चट्टोपाध्यायमहोदयस्य समीपे अभूत्। ग्रामस्य पाठशालायां पाठं समाप्य, स नवमे वयसि पिता–ठाकुरदासवन्दोपाध्यायेन सह कलिकाताम् आगत्य 1829 ख्रीष्टाब्दे जूनमासस्य प्रथमे दिवसे (1236 वङ्गाब्दे जैष्ठमासस्य विंशतितमे दिवसे) सोमवासरे ईश्वरचन्द्रः अध्ययनार्थं संस्कृतमहाविद्यालये प्राविशत्। प्रवेशानन्तरं संस्कृतभाषा तथा संस्कृतशास्त्रविषये अध्ययनं कृतवान्। पञ्चमासाधीकद्वादशवत्सरं यावत् व्याकरणम्, साहित्यम्, अलङ्कारशास्त्रं, वेदान्तशास्त्रं, न्यायशास्त्रं, ज्योतिषशास्त्रं, स्मृतिशास्त्रम् इत्यादिविषये अध्ययनं कृत्वा ज्ञानीजातः। तत्र परिश्रमेन मेधाबलेन च सर्वान् छात्रान् अतिक्राम्य स प्रतिवर्षं विद्यालये उन्नतस्थानमधिकृतवान्। क्रमेण ईश्वरचन्द्रः संस्कृतमहाविद्यालयस्य अन्तिमपरीक्षामुत्तीर्य पाठं समाप्य द्वाविंशतितमवयसि अर्थात् 1841 ख्रीष्टाब्दस्य डिसेम्बरमासस्य दशमदिवसे (1248 वङ्गाब्दस्य अग्रहायणमासस्य विंशतितं दिनाङ्के) संस्कृतमहाविद्यालयः पक्षतः महोदयस्य कृते 'विद्यासागरः' इत्युपाधिं प्रशंसापत्रं च प्रदत्तवान्[4]। विद्यासागरः 1841 तमे वर्षे फोर्टउइलियम् महाविद्यालये उद्योगं कुर्वन् सः पुनः सांख्यपुराणादिविषये अध्ययनं कृतवान्। पाठं समाप्य प्रथमोद्योगः फोर्टउइलियाम–महाविद्यालये सेरेस्तादारः हेडराइटाररूपेणश्च, अनन्तरं संस्कृतमहाविद्यालये प्रथमोद्योगः 'सहकारी सचिव' रूपेण, पुनः द्वितीवारं फोर्टउइलियाम–महाविद्यालये कोषाध्यक्षः हेडराइटाररूपेण च, अन्तिम उद्योगः 05–12–1850 तमे दिनाङ्के विद्यासागरमहोदयः संस्कृतमहाविद्यालयस्य साहित्यविषये अध्यापकः संजातः, ततः 1851 तमे वर्षे जानुयारीमासस्य द्वाविंशतितमे दिनाङ्के अध्यक्षपदं लब्धवान्। भारतभूमौ लब्धजन्मेषु सर्वेषु महापुरूषेषु ईश्वरचन्द्रः विद्यासागरः, यस्य पूर्वसंज्ञा आसीत् ईश्वरचन्द्रवन्दोपाध्यायः, यश्च युगपुरूषरूपेण सर्वैः स्मर्यते। महापुरूषोऽयम् आधुनिककालस्य शिक्षाविद्, स्मृतिशास्त्रमर्मज्ञः, दार्शनिकः, प्रकाशकः, मानवतावादी, युक्तिवादी विज्ञानमनस्कः, वास्तववादी, प्रयोजनवादी समाजसंस्कारकश्च आसीत्। बङ्गप्रदेशे बङ्गगद्यभाषायाः समृद्ध्यर्थं, संस्कृतभाषायाः संस्कृतसाहित्यस्य च विकाशे ईश्वरचन्द्र–विद्यासागरस्य योगदानं परिलक्ष्यते ।

**कृतयः** - ईश्वरचन्द्रविद्यासागरः न केवलं विशुद्धः साहित्यिकः आसीत्, अपि तु तस्य सर्वाः रचनाः प्रायेण संस्कृतविषयस्य शिक्षार्थम् अथवा समाजसंस्कारार्थं निर्दिष्टाः। सः संस्कृतविषयस्योपरि संस्कृतभाषायां बङ्गभाषायां च निम्नलिखितग्रन्थान् विरचयामास । सर्वे ग्रन्थाः प्रकाशिताः। विद्यासागरविरचितस्य संस्कृतसाहित्यसम्भारस्य विभाजनं कृतवान् साहित्यिकः आजाहारोद्दिनखानमहोदयः। यथा –

**क) शिक्षामूलकरचनासमूहः** - 'संस्कृतव्याकरणस्य उपक्रमणिका' (1851), 'ऋजुपाठः' (प्रथमखण्डः, द्वितीयखण्डः, तृतीयखण्डश्च)(1851, 1852, 1853), 'समग्र व्याकरणकौमुदी' (1853), 'कथामाला' (1856) ।

**ख) मौलिकबङ्गरचनासमूहः** - 'संस्कृतसाहित्यशास्त्रविषयकप्रस्तावः' (1856)।

**ग) मौलिकसंस्कृतरचनासमूहः** - 'वामनाख्यानम्' (1873), 'संस्कृतरचना' (1889), 'श्लोकमञ्जरी' (1890), 'भूगोलखगोलवर्णनम्' (1892) ।

---

[4] . मा.र.ई.वि. – पृ. 27

**घ) अनुवादविषयमाश्रित्य अनुसृजनमूलकरचनासमूहः** - 'वासुदेव चरितम्' (1847), 'सीतायाः वनवासः' (1860), महाभारतः (उपक्रमणिकाभागः)(1860)।

**ङ) सम्पादितरचनासमूहः** - 'रघुवंशम्' (1853), 'किराताज्जुनीयम्' (1853), सर्वदर्शनसग्रहः (1853), 'शिशुपालवधम्' (1857), 'कुमारसम्भवम्' (1861), 'कादम्बरी' (1862), 'मेघदूतम्' (1869), 'उत्तररामचरितम्' (1870), 'अभिज्ञानशकुन्तलम्' (1871), 'हर्षचरितम्' (1883) इत्यादयः।

**ईश्वरचन्द्रविद्यासागरः तथा संस्कृतभाषा संस्कृतसाहित्यञ्च** -ईश्वरचन्द्रविद्यासागरमहोदयः संस्कृतभाषायाः साहित्यस्य च प्रचाराय प्रसाराय च बङ्गप्रदेशे पठितृणां निर्माणार्थं च नैकेषां ग्रन्थानां सम्पादनम् अनुवादं च कृतवान्। सः संस्कृतशास्त्रस्य मौलिकग्रन्थं पठित्वा सरलभावेन स्वयं विरचितग्रन्थे मौलिकग्रन्थस्य विषयः उपस्थापितवान्। । सः संस्कृतभाषायां ग्रन्थान्नपि लिलेख।

**क) शिक्षामूलकरचनासमूहः -**

i ) **संस्कृतव्याकरणस्य उपक्रमणिका** - संस्कृतव्याकरणशास्त्रे पाणिनिप्रणीतः अष्टाध्यायी मूलव्याकरणग्रन्थम्। अष्टाध्यायी-ग्रन्थस्य नव्य-व्याकरणकौमुदी परम्परा नवीनशिक्षार्थिनः सूत्रवृत्ति-उदाहरणादिनां कण्ठस्थीकरणेन संस्कृतभाषायाः ज्ञानस्य लक्ष्यस्थलं न प्राप्नुवन्ति। तस्मादेव कारणात् संस्कृतशिक्षायाः प्रवेशद्वारस्य व्याकरणस्य सारल्यार्थं ईश्वरचन्द्रविद्यासागरमहोदयः पाणिनिव्याकरणम् अनुसृत्य नव्यव्याकरणशिक्षार्थीनां बङ्गभाषायां संस्कृतव्याकरणशिक्षणाय सरलोपायेन प्राथमिकज्ञानं सम्पादयितुम् एव सूत्रवृत्तिणां समावेशः अकृत्वा 'संस्कृत-व्याकरणस्य उपक्रमणिका'(1851) इति ग्रन्थं विरचयामास।

किमर्थं पाणिनीयसूत्रपरम्परां विहाय आचार्येन "उपक्रमणिका" विरचिता इति चेत् उच्यते यद्, तदानीं वैदेशिकाः अपि प्राच्यज्ञानं सम्पादयितुं संस्कृतशिक्षायाम् अनुरक्ता आसन्। तेषां कृते सुलभतया संस्कृतभाषाज्ञानम् उत्पादयितुं पण्डिताः संस्कृतव्याकरणस्य ग्रन्थानां संरचनं कृतवन्तः। तेषु ग्रन्थेषु सूत्रभाष्यवर्जिता इयम् उपक्रमणिका विशिष्ठं स्थानं लब्धम्।

अस्मिन् उपक्रमणिकाग्रन्थे प्रकरणानुसारेण व्याकरणस्य विषयाः वर्णिताः सन्ति। तत्र आदौ वर्णप्रकरणम्। अत्र देवनागरीवर्णमाला स्वराः व्यञ्जनानि वर्णसंयोगाः, वर्णविश्लेषादि, वर्णस्य उच्चारणस्थानं च वर्णितानि।

ततःपरं विद्यते सन्धिप्रकरणम्। वर्णद्वयस्य परस्परमेलनमेव सन्धिः इत्युच्यते। पाणिनीयव्याकरणे यच्च संहिता इति पदाख्यः। 'परः सन्निकर्षः संहिता'[5] इति सूत्रं विहितम्। उपक्रमणिकायां स्वरसन्धिः अपि च व्यञ्जनसन्धिः इति द्विधा विभज्य तद्विषये आलोचितम्।

एवं रूपेण णत्वविधानं, षत्वविधानं, सुवन्तप्रकरणे विभक्तेः आकृतिः, स्वरान्तशब्दाः, व्यञ्जनान्तशब्दाः, सर्व्वनामशब्दाः, संख्यावाचकशब्दाः, लिङ्गवचनादि भेदेन पदानां रूपानि, सर्वणां वैचित्रम्, अव्ययपदानि, क्रियापदानि च वर्णितानि। स्त्रीप्रत्ययः, कारकविभक्तिनिर्णयः, विशेष्य-विशेषणं तिङन्तशब्दाः, अकर्म्मकक्रिया, सकर्म्मकक्रिया, धातुरूपाणि, वाच्यपरिवर्तनं, कृदन्तशब्दाः, समासः, तद्धितप्रत्ययः इत्येते मुख्यविषयाः अस्मिन् ग्रन्थे समुपलभ्यन्ते। अस्य ग्रन्थस्य अध्ययनेन सामान्यमतिबालकाः नव्यसंस्कृतव्याकरणशिक्षार्थी च अनायासेन प्राथमिकं संस्कृतज्ञानं सम्पादयितुम् अर्हति।

ii) **समग्रव्याकरणकौमुदी** - संस्कृतव्याकरणशिक्षार्थं विद्यासागरविरचितः द्वितीयग्रन्थो भवति "समग्र व्याकरणकौमुदी"। ग्रन्थेऽस्मिन चत्वाराः भागः वर्तन्ते। विद्यासागरविरचितस्य व्याकरणग्रन्थद्वयस्य विषये समैक्यता दृश्यते। अस्मिन् ग्रन्थे उपक्रमणिकाग्रन्थस्य विषयाः प्रथमभागत्रये सूत्रविहीनव्याख्यारूपेण, अधिकं सरलोदाहरणेन एवञ्च अन्तिम् चतुर्थभागे

[5]. अष्टा. 1-4-109

विशेषरूपेण सूत्र-सहितोदाहरणेन विषया: विस्तृतरूपेण प्रतिपादितता:। ग्रन्थस्य मूलवैशिष्ट्यं छात्राणां संस्कृतव्याकरणशिक्षार्थिणां आशुबोधाय, सारल्येन उपायेन संस्कृतव्याकरणशिक्षणम्।

व्याकरणकौमुद्यां प्रथमभागत्रये सूत्रविहीन, व्याख्यारूपेण, बहु सरलोदाहरणेन वर्णनिर्णय:, सन्धिप्रकरणं, सुवन्तप्रकरणं, तिङन्तप्रकरणम्, अव्ययम्, कृत्यप्रकरणम् उपसर्गादिनां स्वरूपम् इत्यदया: विषया: वर्णिता: सन्ति।

व्याकरणकौमुद्यां चतुर्थभागस्य विशेषवैशिष्ट्यं सूत्रसहितव्याख्या, उदाहरणेन विषयस्य प्रतिपादनं परिलक्ष्यते। चतुर्थभागस्य विषयो भवति कारकविभक्तिनिर्णय:, तद्धितप्रत्ययप्रकरणम्, स्त्रीप्रत्ययनिर्णय:, समासप्रकरणम् इत्यादय:। अस्मिन् ग्रन्थे पाणिनिप्रणितसूत्रस्य ग्रहणेन सूत्रं किञ्चित् भिन्नतया परिलक्ष्यते। अस्मिन् भागे पाणिनिप्रणितदीर्घसूत्रस्य खण्डनं कृत्वा लघुसूत्रं एवञ्च कठिनसूत्रं सरलीकृतम्। प्राप्ते प्रयोजने स्वसूत्रं रचयित्वा विषय: प्रतिपादित:। यथा –

i ) पाणिनिरचितस्य कठिन सूत्रस्य स्थाने सरलसूत्रं 'पञ्चमीविभक्ति'[6] स्थले 'निकृष्टादेकोत्कर्षे'[7], 'वोपसर्जनस्य'[8] स्थले 'सह: सो विभाषा'[9] इदं सूत्रद्वयम्। ii) दीर्घसूत्र: यथा – 'प्रातिपदिकार्थ-लिङ्गपरिमाण-वचनमात्रे प्रथमा'[10] इति सूत्रस्य स्थाने 'अभिधेयमात्रे प्रथमा' [11] 'कर्तरि' [12] इति सूत्रे। सर्व्वसमास-साधारणविधिनिर्णय: सूत्रं 'अषष्ठ्यतृतीयास्थस्यऽन्यस्य दुगाशीराशास्थाऽऽस्थितोत् सुकोतिकारकरागच्छेषु'[13] इदं दीर्घसूत्रं विभज्य कृत्वा लघुकायं 'दुरन्यादाशीरादिषु[14], 'न तृतीया षष्ठ्यो:,[15] सूत्रद्वये दीर्घसूत्रस्य विषय: प्रतिपादितम्।

iii) संज्ञावोधकं स्व विरचितसूत्रं परिलक्ष्यते यथा – 'संख्याकारकादिबोधयित्री विभक्ति:'[16] 'क्रियान्वयि कारकम्'[17], 'एकपदीभावसमास:'[18] इत्यादीनि। एवं रूपेण आचार्यविद्यासागरस्य व्याकरणकौमुदीग्रन्थे वैशिष्ट्यं परिलक्ष्यते।

**iii) ऋजुपाठ: (प्रथमखण्ड:) -** ऋजुपाठ: इति नामकम् ग्रन्थस्य प्रथमखण्डे नारायणशर्माविरचितस्य पञ्चतन्त्रस्य किञ्चिद् उपख्यानं, वेदव्यासविरचित: महाभारतश्च किञ्चिदंशम् उद्धतं विरचितम्। पञ्चतन्त्रस्य रचनांप्रणाली दृष्ट्वा बोध: जायते, पञ्चतन्त्र: अतीव प्राचीन: ग्रन्थम्। नव संस्कृतशिक्षार्थीनां वालानां च कृते सारल्येन विषयावगमनाय ईश्वरचन्द्रविद्यासागरमहोदय: ग्रन्थस्य दीर्घसमासवाक्ये अर्थबोध: तात्पर्यञ्च न जायते इति अवगम्य सर्वजनवोधनाय विषया: सरलाकृता:। महाभारतस्य विषयेऽपि नीतिगर्भ:प्रस्तावस्य मध्ये आदिपर्वन: तथा वनपर्वन: च विषयं उपस्थापितवान्।

---

6 . अष्टा. 2-3-42

7 . स.व्या.कौ. पृ. 474

8 . अष्टा. 6-3-82

9 . स.व्या.कौ. पृ. 636

10 . अष्टा. 2-3-46

11 . स.व्या.कौ. पृ. 465

12 . स.व्या.कौ. पृ. 465

13 . अष्टा. 6-3-99

14 . स.व्या.कौ. पृ. 658

15 . स.व्या.कौ. पृ. 659

16 . स.व्या.कौ. पृ. 465

17 . स.व्या.कौ. पृ. 487

18 . स.व्या.कौ. पृ. 601

iv) **ऋजुपाठः (द्वितीयखण्डः)** - अस्य ग्रन्थस्य द्वितीयखण्डे महर्षि वाल्मीकि विरचतस्य प्रसिद्धआदिकाव्य रामायणस्य विषयः स्वीकृतः। संस्कृत-भाषाया प्राञ्जल:प्रसादगुणविशिष्टं काव्यं रामायणम् इति, सप्तकाण्डात्मकं रामायणमिति। अस्मिन् ग्रन्थे अयोध्याकाण्डस्य रचनावैशिष्ठ्यं चमत्कारी एवं चित्तहारिणी, एतद् निमित्तर्थं ऋजुपाठः द्वितीयखण्डे अयोध्याकाण्डस्य कतिपय उत्कृष्टविषया संकलिताः।

v) **ऋजुपाठः (तृतीयखण्डः)** - अस्मिन् खण्डे हितोपदेशः, विष्णुपुराणं, भट्टिकाव्यं, ऋतुसंहारः इत्यादिना ग्रन्थानां विषयाः सङ्कलिताः। ग्रन्थसमूहस्य केचन विषयः परित्यज्य परिवर्तिनानि अभवत्।

हितोपदेशग्रन्थस्य ग्रन्थकर्ता विष्णुशर्मा वालकानां नीतिशिक्षाप्रदानार्थं पुस्तकं विरचयामास। चतुषु खण्डेषु विभक्तः ग्रन्थोऽयं, यथा - मित्रलाभः, सुहृदभेद, विग्रहः सन्धिश्च। तन्मध्ये मित्रलाभः प्रकरणस्य विषयः ऋजुपाठः तृतीयखण्डे परिगृहीतः।

vi) **कथामाला** – 'कथामाला' इति ग्रन्थे नीतिवाक्यमूलकं 74 संख्याकाः कथाः वर्णिताः सन्ति। यथा – सर्पः कृषकश्च, शशः कूर्मश्च, कुक्कुरः प्रतिविम्बश्च, बालकाः भेकाश्च इत्यादयः।

## ख) मौलिकबङ्गरचनासमूहः -

i) **संस्कृतसाहित्यशास्त्रविषयकप्रस्तावः** – अस्मिन् पुस्तके संस्कृतभाषायाः महत्वं विद्यासागरमहोदयः संकलयामास। संस्कृतमहाकाव्यस्य, खण्डकाव्यस्य, गद्यकाव्यस्य, दृश्यकाव्यस्य च उपाख्यानानि वर्णितानि सन्ति।

## ग) मौलिकसंस्कृतरचनासमूहः -

i) **भूगोलखगोलवर्णनम् –** विद्यासागरमहोदयः 1839 संवत्सरे मियरसाहेवस्य घोषित-पुरस्कार-प्रतियोगितार्थं भूगोलखगोलवर्णनात्मके शीर्षके 408 श्लोकाः रचिताः। काव्यवस्तु यथोक्तं ग्रन्थे एव –

**पुराणसूर्यसिद्धान्ते युरोपीयमतानुगम्।**
**कर्तव्यं किल भूगोलखगोलपरिवर्तनम्।। 2।।**
**प्रथमं वर्णनीयं तु तत्र पौराणिकं मतम्।**
**कार्यं क्रमेणापरयोर्मतयोर्वर्णनं ततः।। 3।।**

अत्र अंशद्वयं वर्तते। प्रथमं तावत् खगोलांशे 279 श्लोकाः सन्ति। शिष्टाः श्लोकाः भूगोलांशे वर्तन्ते। अत्र खण्डचतुष्टये एशिया-युरोप-आफ्रिका-अमेरिकादेशाः वर्णिताः। यथा –

**अन्यः काश्मीरदेशोऽस्ति यत्र च्छगलरोमभिः।**
**शालसंज्ञानि वासांसि शिल्पिनो रचयन्त्यलम्।। 294।।**
**फ्रान्सस्य पश्चिमे भागे आट्लाण्टिकपयोनिधिः।**
**भूमध्यस्थोऽर्णवो याम्यो हलण्डो देश उत्तरे।। 324।।**
**अपरो मिशरो नाम देशोऽस्त्यत्रातिसुन्दरः।**
**प्रधाननगरं तस्य केरो नामकमीरितम्।। 390।।**
**व्राजिलो नाम कोऽप्यन्यः प्रदेशोऽस्त्यतिविस्तृतः।**
**मनोहराणां हीराणामकरस्तत्र वर्तते।। 408।।**

ii) **श्लोकमञ्जरी** - अस्मिन् ग्रन्थे विद्यासागरेण 213 सङ्ख्यकाः श्लोकाः सङ्कलिताः सन्ति। मुख्यभागे 173 श्लोकाः विविधविषयकास्तथा परिशिष्टे शृङ्गाररसभरिताः 40 श्लोकाः सन्ति। दारिद्र्यवर्णनपरकः श्लोको यथा –

**मद्गेहे मुषलीव मूषिकवधूर्मूषीव मार्जारिका**

**मार्जारीव शुनी शुनीव गृहिणी वाच्य किमन्यो जनः।**

**मूर्च्छापन्नशिशूनसून् विजहतः संवीक्ष्य झिल्लीरवै-**

**र्लूतातन्तुवितानसंवृतमुखी चुल्ली चिरं रोदिति।। 11।।**

कानिचन स्फुटपद्यानि तस्य बाल्यकालरचितानि (1293 वङ्गाब्दे)। मेघं प्रति अन्योक्तिर्यथा –

**त्वं हि स्वभावमलिनस्तव नाश्यमब्जं**

**त्वद्वर्जितं विरहिवर्गनिसर्गवैरि।**

**कस्त्वं स्तुवीत वद तोयद लोकसिद्धां**

**प्रेक्षामहे न यदि जीवनदायितां ते।।**

विद्यायाः स्तुतिः केन पण्डितेन वा न क्रियते। तस्यैव वचनेन प्रशंसिता भवतु तत्र वरदा –

**अज्ञानखण्डनकरी धनमानहेतुः**

**सौरव्यापवर्गफलमार्गनिदेशिनी च।**

**सा नः समस्तजगतामभिलाषभूमि-**

**र्विद्या निरस्य जडतां धियमादधातु।।**

**घ) अनुवादमूलकः अनुसृजनमूलकरचनासमूहः -**

i) **वासुदेवचरितम्** – 'वासुदेवचरितम्' ग्रन्थे 'श्रीमद्भागवतगीतायाः' उपदेशमूलकाः संस्कृतसाहित्यविषयस्य च वङ्गानुवादं कृतवान्।

ii) **सीताया वनवासः** – विद्यासागरविरचितस्य 'सीतायाः वनवासः' (1860) इत्याख्यस्य गद्यस्य प्रथमद्वितीयपरिच्छेदयोः अधिकांशः भवभूतेः उत्तररामचरितनाटकात् प्रथमाङ्कात् परिगृहीतः, अवशिष्टषड्परिच्छेदाः रामायणस्य उत्तरकाण्डावलम्बनपूर्वकं संकलितवान्। विद्यासागरः 'सीतायाः वनवासः' इत्यत्र समासवद्धदीर्घशब्दानां नातिपरिचित-संस्कृतशब्दानां प्रयोगञ्च कृतवान्। सीतायाः वनवासः इत्यत्र करूणरसः एव प्रधानः। अतः विशेषरूपेण विद्यासागरः एतत्काव्यं "कान्नार जोलाप"[19] इति उक्तवान्। विद्यासागरः चिन्तयन्ति स्मa सीतायाः वनवासः न भवति चेत् उत्तरचरितस्य महिमा किञ्च वैशिष्टवोधस्य मार्गान्विषने वङ्गीयाः असमर्थाः स्युः। 'संस्कृतानुरागी भाषा' अपूर्वमहिमा तथा रससञ्चारणं कर्तुं शक्नोति तत् अद्यापि "एतदेव जनस्थानमध्यवर्ती प्रसवनगिरिः"[20] इत्यादेः वर्णनापाठे वयं दृष्ट्यानन्दम् उपलब्धं शक्नुमः। भावेन भाषया च क्लासिकरीत्या शृङ्गाररीत्या च दृश्यते वर्णनस्थलम्।

iii) **महाभारतः (उपक्रमणिकाभागः)** - विद्यासागरेण अनुदितग्रन्थेषु विशिष्टतया उल्लेखयोग्यः भवति महाभारतस्य उपक्रमणिका (जानुयारी, 1860) । महाभारते विद्यासागरः क्लासिकसंस्कृतस्य बङ्गानुवादस्य आदर्शं स्थापितवान्।

---

19 . वि.र.स. – तृ.ख. (भू) – पृ. 18

20 . वि.र.स. – तृ.ख. (भू) – पृ. 18

महाभारतनामकमूलग्रन्थस्य भावपरिवर्तनमकृत्वा विद्यासागर: क्लासिकगुणान्वितबङ्गभाषया एतदनुदितवान्। विद्यासागरस्य मते एतत्पुस्तकं पठित्वा पाठका: यदि किञ्चिदपि प्रीतियुक्ता: भवन्ति तर्हि तस्य श्रम: सफलो भविष्यति इति स्वयं पत्रे उल्लिखितवान्।

**ङ) सम्पादितरचनासमूह: -**

i) **रघुवंशम्** – कालिदासरघुवंशमहाकाव्यं सर्वांशे उत्कृष्टम्। रघुवंशे सूर्यवंशीयनरपतिनां चरित्रं वर्णितमस्ति। अवशिष्टसर्गे रामस्य उत्तराधिकारिणां वृत्तान्तमुक्तमस्ति।

ii) **किरातार्जनुयीम्** – किरातार्ज्जुनीयकर्ता भारवि: कालिदासस्य उत्तरकालस्य रचना। अस्य महाकाव्यस्य रचना अतिप्रगाढ: परन्तु किञ्चित् दुरहोऽपि। कालिदासरचनावत् सरलतां न भजते। किरातार्ज्जुनीये युधिष्ठिरादिपञ्चपाण्डवानां द्वैतवने वास:, शिव: अर्जुनस्य वीरत्वं दृष्ट्वा मुग्धो भूत्वा अर्जुनेन इप्सितं पाशुपतनामकमस्त्रं प्रदत्तवान्। एवं क्रमेण एतत् सर्वं वर्णितमस्ति।

iii) **कुमारसम्भवम्** – कालिदासस्य द्वितीयं महाकाव्यं कुमारसम्भवं सप्तदशसर्गेषु विभक्तमस्ति। अस्मिन् महाकाव्ये ब्राह्मणस्य वरप्राप्ति: तरकाया: स्वर्गराज्ये अधिकार:, हरपार्वत्यो: परिणय: तथा कार्तिकस्य जन्म, दुर्वृत्ततारकासुकस्य प्राणसंहार:, तथा च देवतानां स्वाधिकारे पुन: स्थापिताकरणम् इत्यादिवृत्तान्ता: सुचारुरूपेण कुमारसम्भवे सविस्तरं वर्णिता: प्राप्यते। विद्यासागर: भङ्गपाठकानां कृते संस्कृतमहाकाव्यविषये कवीनां विषये च सुस्पष्टधारणाप्रदानार्थं प्रयासं कृतवान्।

iv) **कादम्बरी** – वङ्गगद्यस्य जनक: विद्यासागरमहोदय: वाणभट्टप्रणीत कादम्बरी इति नामकसंस्कृतगद्यकाव्यस्य चन्द्रापीडनामकराजकुमारस्य तथा गन्धर्वराजचित्ररथस्य कन्या कादम्बर्या: वृत्तान्तं बङ्गभाषया अनुवादं कृत्वा वङ्गीयसमाजस्य पाठकानां संस्कृतगद्यकाव्यविषये रुचिमुत्पादितवान्।

v) **मेघदूतम्** – संस्कृतखण्डकाव्येषु कालिदासप्रणीतस्य अष्टदशाधिकशतश्लोकात्मकमेघदूतं सर्वोत्कृष्टम्। कालिदासस्य काव्येऽस्मिन् नानागिरिनदी-उपवन-ग्राम-नगर-क्षेत्र-देवालय-राजधानी-हिमालय-अलका-यक्षालयादिविषये तथा यक्षस्य तत्पत्न्या: विरहावस्थादया: वर्णितास्सन्ति। विद्यासागरमहोदयस्य मतेन मल्लिनाथ: काव्यव्याख्याविषये अद्वितीय:। विद्यासागर: मेघदूतखण्डकाव्यं पठित्वा 110 श्लोका: कालिदासप्रणीता: इति स्वीकृवान्। अवशिष्टा: 17 श्लोका: तदीयलेखन्या: मुखात् विनिर्गत: नास्ति इति स्वीकृतवान्।

vi) **उत्तररामचरितम्** – भवभूतिविरचितम् उत्तरामचरितं करुणारसान्वितं नाटकम्। नाटकमिदं कारूण्ये मार्धुर्ये अर्थगाम्भीर्येपरिपूर्णमासीत् इत्यस्य उपलब्धिं कृतवान् विद्यासागर:। करूणरसविषये भवभूते: उत्तररामचरितं संस्कृतभाषाया: सर्वोत्कृष्टकाव्यम्। विद्यासागर: चिन्तयन्ति स्म नाटकमिदं सहृदयजनान् बहुषु स्थलेषु मोहितं तथा अश्रुपातं जनयितुं शक्नोति। उत्तरचरितनाटकं कलिकाताविश्वविद्यालयस्य परीक्षापुस्तकं स्थिरीकृत्य विद्यासागर: अस्य नाटकस्य संस्करणे प्रवृत्तो अभवत्।

vii) **अभिज्ञानशकुन्तलम्** – कालिदासप्रणीतम् अभिज्ञानशकुन्तलं संस्कृतभाषायां सर्वोत्कृष्टं नाटकम्। विद्यासागर: अस्य नाटकस्य उपाख्यानभागस्य संकलनेन कालिदासस्य तथा अभिज्ञानशकुन्तलस्य अवमाननां कृतवान्। स: बङ्गीयपाठकानां प्रति प्रार्थनां कृतवान् यत् तत्संकलितशकुन्तलां पश्यन् कालिदासकृतस्य अभिज्ञानशकुन्तलस्य उत्कर्षपरीक्षणं न क्रियते।

viii) **हर्षचरितम्** – विद्यासागर: स्वस्य परममित्रात् प्रसिद्धचिकित्सकात् विद्यारत्नसमीपात् वाणभट्टप्रणीतहर्षचरितपुस्तकं प्राप्तवान्। बङ्गीयसमाजस्य विशिष्टानुरोधकारिण: महोदया: विद्यासागरं नानाकारणं प्रदर्शयन्त: हर्षचरितपुस्तकस्य वङ्गीयमुद्रणकार्ये प्रवर्तितवन्तश्च।

ix) **सर्वदर्शनसंग्रह:** - माधवार्चार्यविरचित: सर्वदर्शनसंग्रह: इत्यस्य ग्रन्थस्य सम्पादनं कृत्वा आचार्य: विद्यासागरमहोदय: शिक्षार्थीनां कृते स्वयं स्थापित: संस्कृतयन्त्र: नामक: मुद्रनकेन्द्रत: प्रकाशितम्।

आधुनिकपाश्चात्यज्ञानविद्यया सह देशेऽस्मिन् संस्कृतविद्यायाः योगसूत्रस्थापनाय संस्कृतशिक्षायाः प्रचलनाय च विद्यासागरः महत्कीर्तेः अधिकारी आसीत्। संस्कृतमुद्रणयोग्यपाठ्यपुस्तकस्य रचनायां पथिकृत् आसीत् विद्यासागरः। पाठ्यपुस्तकरचनया सह तस्य मनोनिवेशः आसीत् मौलिकरचनासु अनुवादमूलकरचनासु च। संस्कृतभाषायाः विस्ताराय बङ्गप्रदेशे पठितृणां निर्माणार्थम् एकाधिकग्रन्थानां सम्पादनम् अनुवादञ्च कृतवान्। बङ्गदेशे संस्कृतसाहित्यविस्तारविषयेऽपि ईश्वरचन्द्रविद्यासागरमहोदयस्य अग्रगन्य-भूमिका आसीत्। शिक्षां विना देशस्य मनुष्यानां सम्पूर्णोन्नोतिः असम्भवः इति तस्य उपलब्धिरासीत्। अतः युगपोयोगीशिक्षाप्रसारार्थं पाठ्यविषयस्य संस्कारसाधने समृद्ध्यर्थं विद्यासागरस्य अवदानम् अविस्मरणीयम्।

- **सङ्केताक्षरसूची**

1 . म.भा. - महाभारतम्
2. नी.श. - नीतिशतकम्
3. मा.र.ई.वि. - मानवरत्न ईश्वरचन्द्र-विद्यासागर
4. अष्टा. - अष्टाध्यायी
5. स.व्या.कौ - समग्र व्याकरणकौमुदी
6. वि.र.स. - विद्यासागर रचनासमग्र

- **सहायकग्रन्थसूची**

1. अनन्य अद्वितीय विद्यासागर - अमलेश मिश्र, दे पावलिकेशन्स, कलिकाता - 2019
2. अष्टाध्यायी - डा. नरेश झा, चोखम्बा सुरभारती प्रकाशन्, वारानसी - 2006
3. नीतिशतकम् - डा. राजेश्वरशास्त्री मुसलगावकरः, चौखम्बा प्रकाशन्, वारानसी - 2003
4. विद्यासागर रचना समग्र (प्रथमखण्ड) - रञ्जन चक्रवर्ती, विद्यासागर विश्वविद्यलय, मेदिनीपुर - 2016
5. विद्यासागर रचना समग्र (द्वितीयखण्ड) - रञ्जन चक्रवर्ती, विद्यासागर विश्वविद्यालय,मिदिनीपुर - 2019
6. विद्यासागर रचना समग्र (तृतीयखण्ड) - सत्येन्द्रनाथ सेन, पश्चिमबङ्ग निरक्षरता दूरीकरन समिति,
1. कोलकाता - 12, साक्षरता प्रकाशन - 1972
7. महाभारतम् - सम्पा. उषा शर्म, मानसी प्रकाशन्, मीरट - 1990
8. मानवरत्न ईश्वरचन्द्र विद्यासागर - मौसम मजुमदार, तपती पाबलिकेशन, कोलकाता - 2019
9. संस्कृत व्याकरणस्य उपक्रमणिका - ईश्वरचन्द्र विद्यासागर, संस्कृतयन्त्रः, कलिकाता - 1908
10. समग्र व्याकरण-कौमुदी - श्रीयुक्त दुर्गाचरण सांख्य-वेदान्ततीर्थ, संस्कृत वुक डिपो, कलिकाता - 2010
2. संस्कृत व्याकरणशास्त्रेतिहासविमर्शः - डा. अशोकचन्द्र गौड शास्त्री, भारतीय विद्यासंस्थानम्, वाराणसी – 1977
11. संस्कृतसाहित्ये पश्चिमवङ्गस्यावदानम् - नारायणदाशः; कथाभारती, कलिकाता - 2013
12. संस्कृत साहित्येर इतिवृत्तः - ड. गोपेन्दु मुख्योपाध्याय, इउनाइटेड वुक एजेन्सी, कलिकाता – 1419
3. वङ्गाब्दः

4. संस्कृत साहित्ये बाङागीर दान - सुरेशचन्द्र वन्दोपाध्याय, संस्कृत पुस्तक भाण्डार, कलिकाता- 1369
5. वङ्गाब्दः
13. A History of Indian Literature - Maurice Winternitz, University of Calcutta 1927
14. Sanskrit Culture of Bengal - Suresh Chandra Banerji, Sharada Publishing House, Delhi - 2004

- Websites
    1. www.google.com
    2. www.wikipedia.com